योगवासिष्ठः/प्रकरणम् ४ (स्थितिप्रकरणम्)/सर्गः ३६

षट्त्रिशः सर्गं ३६

श्रीराम उवाच ।

यथेदृशं स्थितं विश्वं विश्वातीते चिदात्मनि ।

तन्मे कथय हे ब्रह्मन् पुनर्बोधविवृद्धये ।। १

श्रीवसिष्ठ उवाच ।

यथोर्मयोऽनभिव्यक्ता भाविनः पयसि स्थिताः ।

न स्थिताश्चात्मनोऽन्यत्वाच्चित्तत्वे सृष्टयस्तथा ।। २

यथा सर्वगतः सौक्ष्म्यादाकाशो नोपलक्ष्यते ।

तथा निरंशश्चिद्भावः सर्वगोऽपि न लक्ष्यते ।। ३

सुस्थितेवास्थितेवान्तः प्रतिभास्ति मणौ यथा ।

न सत्यभूता नासत्या तथेयं सृष्टिरात्मनि ।। ४

स्वाधारैरम्बुदैः स्वस्थैर्न स्पृष्टं गगनं यथा ।

चित्स्थैः सर्गैश्चिदाधारैर्न स्पृष्टा चित्परा तथा ।। ५

जलधिष्ठिततत्तेजो यथाङ्ग प्रतिबिम्बति ।

तथा पुर्यष्टकेष्वेव चिद्धि देहेषु लक्ष्यते ।। ६

सर्वसंकल्परहिता सर्वसंज्ञाविवर्जिता ।

सैषा चिदविनाशात्मा तच्चेत्यादिकृताभिधा ।। ७

आकाशशतभागाच्छा ज्ञेषु निष्कलरूपिणी ।

सकलाकलसंसारस्वरूपैकात्म्यदर्शिनी ।। ८

तरङ्गादिमयी स्फारा नानाता सलिलार्णवे ।

तस्मान्न व्यतिरेकेण यथा भावविकारिणी ।। ९

त्वत्तामत्तामयी स्फारा नानातेयं चिदर्णवे ।
चिन्मात्रव्यतिरेकेण तथा नैव प्रकाशते ।। १०
चिच्चिनोति चितं चेत्यं तेनेदं स्थितमात्मनि ।
अज्ञेऽज्ञे त्वन्यदायातमन्यदस्तीति कल्पना ।। ११
अज्ञेष्वसत्स्वभावोग्रसंसारगणगर्भिणी ।
ज्ञेषु प्रकाशरूपैव सकलैकात्मिका सती ।। १२
अनुभूतिवशान्नित्यमर्कादीनां प्रकाशिनी ।
स्वादिनी सर्वभूतानां भाविनी भवभोगिनाम् ।। १३
नास्तमेति न चोदेति नोत्तिष्ठति न तिष्ठति ।
न चायाति न वा याति न चेह नच नेह चित्।। १४
सैषा चिदमलाकारा स्वयमात्मनि संस्थिता ।
राघवेत्थं प्रपञ्चेन जगन्नाम्ना विजृम्भते ।। १५
तेजःपुञ्जैर्यथा तेजः पयःपूरैर्यथा पयः ।
परिस्फुरति संस्पन्दैस्तथा चित्सर्गविभ्रमैः ।। १६
तत्स्वभावेन चिन्नाम्ना सर्वगेनोदितात्मना ।
प्रकाशेनाप्रकाशेन निरंशेनांशधारिणा ।। १७
स्वयं स्वकलनाभोगादनन्तं पदमुज्झता ।
अहमस्मीति भावेन गच्छता ज्ञपदं शनैः ।। १८
नानातायां प्ररूढायामस्यां संसृतिपूर्वकम् ।
भावाभावग्रहोत्सर्गपदे स्थितिमुपागते ।। १९
पुर्यष्टकस्पन्दशतैःकरोति न करोति च ।
उत्सेधमेति भूकोशकोटरस्थोऽङ्कुरोत्करः ।। २०
व्योम सौषिर्यमादत्ते सर्वमूर्त्यविरोधि यत् ।
स्पन्दैकधर्मवान्वातो रससरूपतया जलम् ।। २१
दृढोर्वी प्रकटं तेजः स्थितिमन्ति जगन्ति च ।
प्रतिबन्धाभ्यनुज्ञासु कालः कलनया स्थितः ।। २२

पुष्पेषु गन्धतां याति शनैः संचितकेसरम् ।
मृत्कोटररसोल्लासः स्थाणुतामेति भूतले ।। २३
मूलस्थाः फलमायान्ति पेलवा रसलेशकाः ।
संनिवेशं व्रजन्त्येता रेखाः पल्लवपालिषु ।। २४
नवतामनुगृह्णाति शक्रबाणासनेन च ।
यो यो भवत्यविरतं संस्थानेन वनेन च ।। २५
वसन्तमुपतिष्ठन्ति पुष्पपल्लवराशयः ।
निदाघविधिमायान्ति दैवदाहविभूतयः ।। २६
प्रावृट्समयमीहन्ते नीला जलदराशयः ।
शरदं चानुधावन्ति समग्राः फलराशयः ।। २७
हेमन्ते हिमहासिन्यो भवन्ति ककुभो दश ।
नयन्त्युपलतामम्बु शिशिरे शीतलानिलाः ।। २८
न जहाति स्वमर्यादां कालो युगमयीमिमाम् ।
तरङ्गिणीतरङ्गौघलीलया यान्ति सृष्टयः ।। २९
नियतिः स्थितिमायाति स्थैर्यचातुर्यकारिणी ।
तिष्ठत्याप्रलयं धीरा धराधरणधर्मिणी ।। ३०
चतुर्दशविधानीह भूतानि भुवनान्तरे ।
नानाचारविहाराणि नानाविरचनानि च ।। ३१
पुनःपुनर्विलीयन्ते जायन्ते च पुनःपुनः ।
धारापरम्परा याति विना वारीव बुद्बुदाः ।। ३२
आयाति याति परितिष्ठति लीलयाऽति-
स्वार्थानुपार्जयति धावति जन्मनाशैः ।
उन्मत्तवद्विहितभावनमाहितेहा
मुग्धा कृतान्तविवशा जनता वराकी ।। ३३

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये मोक्षोपायेषु स्थितिप्रकरणे चिदादित्यस्वरूपवर्णनं नाम षद्त्रिशः सर्गः

|| ३६ ||